# BANKIM SARDAR COLLEGE

**2nd Semester Examination 2020**

**B.A. HONOURS**

**Subject: SANSKRIT**

**Paper: CC4**

**Time: 2 Hours** **Marks: 90**

**Answer of each group should be in separate answer-sheet**

---

## Group – A (INTERNAL ASSESSMENT)

**1. अधोलिखितेषु प्रश्नेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। (2 × 5 = 10)**

क) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते।

ख) श्रीमद्भगवद्गीतायाः श्लोकसंख्या कति।

ग) श्रीमद्भगवद्गीतायाम् कति अध्यायाः सन्ति।

घ) यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् – इति श्लोकार्धस्य अनुवादं करोतु।

ङ) मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः - इति श्लोकार्धस्य अनुवादं करोतु।

च) कुरुक्षेत्रे के समवेताः सन्ति ?

छ) सन्धिः कार्या- पाण्डवाश्चैव।

ज) सन्धिः कार्या- किमकुर्वत।

## Group – B (TUTORIAL)

**2. अधोलिखितेषु प्रश्नेषु एकः प्रश्नः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। (15 × 1 = 15)**

क) मनसः अज्ञाननिरसने ज्ञानस्य भूमिका इति विषयम् आश्रित्य श्रीमद्भगवद्गीतानुसारं प्रबन्धो विरचनीयः।

ख) अभ्यासस्य कीदृशः प्रकारः श्रीमद्भगवद्गीतायाम् वर्णितः? तेषां स्वरूपं निरूपयतु।

## Group – C (THEORY)

**3. 25 MCQ प्रश्नानि सन्ति । सर्वेषाम् प्रश्नानाम् उत्तरम् देयम् । (1×25 = 25)**

i) श्रीमद्भगवद्गीतायाः उत्सः कः भवति –

क) रामायणम् ख) महाभारतम् ग) पुराणम् घ) बौद्धसाहित्यम्

ii) गीतायाः कियन्तः अध्यायाः सन्ति -

क) एकादश ख) द्वादश ग) पञ्चदश घ) अष्टादश

iii) गीतायाः श्लोकसंख्या का भवति -

क) सप्तशतम् ख) शतसंख्यकम् ग) द्वादश घ) सहस्रम्

iv) गीतायाः प्रथमाध्यायस्य नाम किम् –

क) ज्ञानयोगः ख) कर्मयोगः ग) अर्जुनविषादयोगः घ) सांख्ययोगः

v) श्रीमद्भगवद्गीतायाः प्रवक्ता कः भवति -

क) श्रीकृष्णः ख) श्रीरामः ग) हनुमान् घ) व्याधः

vi) परन्तपः कः आसीत् -

क) भीमः ख) कर्णः ग) अर्जुनः घ) दुर्योधनः

vii) इन्द्रियेभ्यः श्रेष्ठः किम् -

क) चक्षुः ख) जिह्वा ग) मनः घ) शरीरम्

viii) तपः कतिविधम् ?

क) द्विविधः ख) त्रिविधः ग) चतुर्विधः घ) पञ्चविधः

ix) कस्य सविधे योगः दुष्प्रापः भवति ?

क) असंयतात्मनः सविधे ख) धनिनः सविधे ग) वियोगिनः सविधे घ) वणिजः सविधे

x) कस्य सविधे योगः सुप्रापः भवति ?

क) असंयतात्मनः सविधे ख) वशात्मनः सविधे ग) वियोगिनः सविधे घ) वणिजः सविधे

xi) व्यवसायात्मिका बुद्धिः कतिविधः?

क) एक एव ख) द्विविधः ग) त्रिविधः घ) चतुर्विधः

xii) अव्यवसायात्मिका/अव्यवसायिनाम् बुद्धिः कतिविधः ?

क) द्विविधः ख) त्रिविधः ग) चतुर्विधः घ) अनन्ताः

xiii) अर्जुनस्य विशेषनानि

क) गणपतिः ख) हयग्रीवः ग) कौन्तेय घ) वासुदेवः

xiv) कानि मनः हरन्ति ?

क) चक्षुः  ख) कर्णः  ग) नासिका  घ) इन्द्रियाणि

xv) कृष्णस्य विशेषणं किम्?

क) वार्ष्णेयः  ख) कौन्तेयः  ग) राधेयः  घ) वैधेयः

xvi) रजोगुणसमुद्भवः कः?

क) कामः क्रोधः च  ख) कामः लोभः च  ग) कामः मोहः च  घ) कामः मात्सर्यं च

xvii) कामादिषड्-रिपुः कस्मात् जायते ?

क) सत्त्वगुणात्  ख) रजोगुणात्  ग) तमोगुणात्  घ) चतुर्विंशतिगुणात्

xviii) धूमेन किम् आव्रियते ?

क) वह्निः  ख) मुखम्  ग) शरीरम्  घ) दर्पणम्

xix) आदर्शः केन आव्रियते ?

क) मलेन  ख) मुखेन  ग) शरीरेण  घ) जलेन

xx) गर्भः केन आव्रियते ?

क) उल्वेन  ख) मलेन  ग) शरीरेण  घ) मुखेन

xxi) जीवस्य विवेकः केन आव्रियते ?

क) सत्त्वगुणेन  ख) रजोगुणेन  ग) तमोगुणेन  घ) चतुर्विंशतिगुणैः

xxii) ज्ञानिनां नित्यवैरी कः?

क) कामः  ख) मोहः  ग) मात्सर्यः  घ) प्रतिवेशी

xxiii) नरकस्य द्वारं कतिविधम् ?

क) एक एव  ख) द्विविधम्  ग) त्रिविधम्  घ) चतुर्विधम्

ख) सन्धिः कार्या – त्वय्युपपद्यते

क) त्वयि + उपपद्यते  ख) त्वयि + उत्पद्यते  ग) त्वय्यु + पद्यते  घ) त्वय्यु + आपद्यते

xxiv) सन्धिः कार्या – तान्यहं

क) तानि + अहम्  ख) तान् + अहम्  ग) ता + निहम्  घ) तानि + हम्

xxv) चक्षुषः विषयः कः

क) तेजः  ख) आपः  ग) क्षितिः  घ) मरुत्

4. **अधोलिखितेषु प्रश्नेषु चत्वारः प्रश्नाः समाधेयाः।** **(10 × 4 = 40)**

क) अहंभावः कथं परित्यजनीय इति विषये श्रीमद्भगवद्गीतानुसारं आलोच्यताम्।

ख) मनुष्याणां कर्मसम्पादनस्य माध्यमं कतिविधम् किञ्च तेषां नामानि । तेषां विषये सविशदम् श्रीमद्भगवद्गीतानुसारं व्याख्यायताम्। (2+8 = 10)

ग) श्रीमद्भगवद्गीतानुसारं बुद्धिः कतिविधा। प्रत्येकासां विषये टीका विरचनीया। (1+3+3+3 = 10)

घ) श्रीमद्भगवद्गीतायाम् वर्णितं भक्तिरिति विषयम् आश्रित्य प्रबन्धो विरचनीयः।

ङ) श्रीमद्भगवद्गीतानुसारं मुक्तिः – आलोच्यताम्।

च) वङ्गभाषया अनुवादः करणीयः (5 + 5 = 10)

i) योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ २.४८॥

ii) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥४.३८॥

******************